पुनश्चतुर्थः इति न वक्तव्यमिति कृत्वा चतुर्ग्रहणं भाष्ये प्रत्याख्यातम् । किञ्च—'तासि च' इत्येवं सूत्रितव्यं न तु 'तासि च कॢपः' (२३५२—७।२।६०) इति । कॢपेरेव हि तासि परस्मैपदित्वान्नेतरेषां वृतादीनाम् इति । तथा च भाष्यवचनम्—(नवृद्भ्यः—इतिसूत्रे) ............'चतुर्ग्रहणं तासि कॢपिग्रहणानर्थक्यञ्च (वार्त्तिकम्)। चतुर्ग्रहणं चानर्थकम् । सर्वेभ्यो वृतादिभ्यः प्रतिषेध इष्यते । तासिग्रहणं (तासि च कॢपः इति सूत्रे) चानर्थकम् । किं कारणम् । निवृत्तत्वात् सकारस्य । निवृत्तं सकारादाविति । तास्ग्रहणे चेदानीमक्रियमाणे कॢपिग्रहणेनापि नार्थः । एषोऽपि हि वृतादिः पठ्यते । भवेत् कॢपिग्रहणं न कर्त्तव्यम् । तास्ग्रहणं तु कर्त्तव्यम् । यदि तत्सकारादाविति । न तच्छक्यं निवर्त्तयितुम् । इहापि प्रसज्येत । वर्त्तिता वर्द्धिता । तास्ग्रहणे चेदानीं क्रियमाणे कॢपिग्रहणमपि कर्त्तव्यम् । भवेत् तासिग्रहणं कर्त्तव्यम् । कॢपिग्रहणं तु नैव कर्त्तव्यम् । अन्येभ्योऽपि वृतादिभ्यस्तासौ कस्मान्न भवति । परस्मैपदेष्विति वर्त्तते । कॢपेरेव च तास् परस्मैपदपरः नान्येभ्यो वृतादिभ्यः ।' इति प्रदीपे च'.........तासि चेत्यपि कर्त्तव्यम् । कॢपि इत्येतत्तु न कर्त्तव्यम् कॢपेरन्येभ्यो वृतादिभ्यः तासेरात्मनेपदपरत्वात् इटोऽभावादि'ति निगमितम् । शब्देन्दुशेखरकारैश्च भट्टोजि—व्याख्यानमनादृत्य भाष्यपक्ष एव समाश्रित इति दिक् । स्यन्दिषीष्ट—स्यन्त्सीष्ट (आशीर्लिङ्)। नलोप इति—'अनिदिताम्—' (४१५) इत्यनेन अङ ङित्वात् । अस्यदत् (अङ्) अस्यन्दिष्ट—अस्यन्त्त (सिच्पक्षे इड्विकल्पः) अस्यन्त इत्यत्र 'झलो झलि' (२२८१) इति सलोपः । अकल्प्स्यत (लृङ्) 'न वृद्भ्यः' इति निषेधात् पूर्ववत् परस्मैपदपक्षे इडभावः । अस्यन्दिष्यत—अस्यन्त्स्यत (आत्मनेपदपक्षे इड्विकल्पः)।

२३४९ । अनुविपर्य्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥८।३।७२॥

दी—। एभ्यः परस्य अप्राणिकर्त्तृकस्य स्यन्दतेः सस्य षो वा स्यात् । अनुष्यन्दते—अनुस्यन्दते वा जलम् । 'अप्राणिषु'

इत्यगुणायादेशाः। गाते गाते गाते—इति—लातात्मिवु क्रमेण—रूपाणि—'टित आत्मने- पदानां टेरे' इति सर्वत्र एत्वम्। एवञ्च प्रथमं स्पष्टम्। द्वितीये तु गा शप्—आते = गा अ आते इत्येवं रूपे स्थिते—'वार्णादाङ्गं बलीयः' इति परिभाषया नाश्रीयते तस्य स्यान्यं काले एव प्रवृत्तिः। एवं च परमपि 'आतो—ङितः' (२२२६—७।२।८१) इति सूत्रं बाधित्वा—'अकः सवर्णे—' (८५—६।१।१०१) इति दीर्घत्वे गा आते इति भवति ततोऽप्यनेनैव गाते इति। वार्णपरिभाषाश्रयणं तु 'आत—' इत्यस्य प्राक् प्रवृत्त्या गेते इति स्यात्। तृतीये तु—गा अ अत इति स्थिते 'आत्मनेपदेष्वनतः (२२५८—७।१।५) इत्यदादेशे एत्वे सवर्णदीर्घे च गाते इति सर्वत्र रूपं तुल्यम्। गासे गाथे गाध्वे। गे—(गा अ इट्—गा अ ए—गा ए—वृद्धिरेचि—७२)। गावहे गामहे। लोटि—गाताम् गाताम् गाताम्। गास्व गाथाम् गाध्वम्। गै गावहै गामहै। लङि—अगात् अगाताम अगात। अगाथाः अगाथाम् अगाध्वम्। अगे (अट् गा शप् इट्—अगा अ इ—अगा—इ—'आद् गुणः' इत्येत्वम्)। विधिलिङि—गेत गयाताम गेरन् इत्यादि स्पष्टम्। गासीष्ट गासीयास्तामित्याद्याशीर्लिङि। अथ गाङ् गतौ इत्यस्य ङित्त्वात् 'गाङ्कुटादिभ्य—' (२४६१)—स्यगाङो ग्रहणं नेत्याह—गाङ्कुटादीति। तत्र 'गाङ् लिटि' (२४५९) इत्यनेन इङ् (१०४६) अध्ययने इत्यस्यादिष्टस्य—गाङो ग्रहणं न तस्य भौवादिकस्य। अतएव गाङ् कुटादिव्यतिरिक्तत्वात् ङिन्न भवति। अङित्त्वाञ्च घुमास्थेति—(२४६२) ईत्वमपि न। तेन अगास्त इत्यादीन्येव लुङि रूपाणि न लगीष्ट इत्यादीनि। आदादिक अदानी पठितः अयम् गाङ् गतौ इति धातुः इति हरदत्तादयो मन्यन्ते। फलन्त्विति—तदाहि गा शप् ते इति स्थिते 'अदिप्रभृतिभ्यः शपः' इति शप् लुकि गाते इति रूपम्। आते इत्यादावपि समानमेव रूपम्। अथ 'उङ्' इत्यस्य रूपं दर्शयति—अवते इत्यादि, ओ शप् ते—ओ अते—अव् अते—अवते सार्वेति (२१६८) गुणत्वेऽवादेशः। लिटि विशेषमाह वर्णादाङ्ग' बलीयः इति 'संहिता कार्यात्—अङ्गकार्यं बलवत्तरम्' इति तदर्थः। तेन उ उ ए इति स्थिते उवङि प्राप्ते उ उव् ए इति जाते अकः—इति सवर्ण दीर्घे ऊवे। अन्यथा सवर्ण दीर्घे प्राग् विहिते ऊ ए इति स्थिते उवङि—ऊव् ए—ऊवे इति स्यादिति

मित—। ऋतेः ईयङ् इतिच्छेदः। ऋतिरिति ऋतधातोरिका निर्देशः। भ्वादिराकृतिगणत्वादस्याप्यनुक्तोऽपि तन्मध्ये—एतस्य रूपं लभते। स चास्मिन्सूत्रे एव इष्यत इति आह—सौत्रः इति। जुगुप्सा निन्दा। एके केचिदित्यर्थः। सनन्ता इति ईयङ् प्रत्ययत्वादिति भावः। ऋतीयते इति। ईयङो ङित्त्वा 'दनुदात्तङित—' इत्यात्मनेपदम्। ङित्त्वेति अन्त्यादेशः। ऋतीयाञ्चक्रे—आम् प्रत्ययादित्याम्। आर्द्धधातुकविवक्षायामिति—अयमर्थः—ईयङ् इति ङिद्भवति। तस्य 'आयादयः—' इत्यनेन यदा—ऋतिना योगो न घटते तदा तस्य ( ऋतेः ) ङित्त्वं न भवति। ङित्त्वाभावाच्च आत्मनेपदित्वमपि—न भवति। अतः आह—शेषादिति। आनर्त्त इति—ऋत्+णल् इति स्थिते द्वित्वे—ऋत् ऋत् णल इति स्थिते 'उरत्—उरण्रपरः हलादिः शेषः' ( इत्यभ्यासकार्यम् ) 'अचो ञ्णिति', 'अत उपधायाः' इत्यनयोर-प्राप्तयोः पुगन्तलघूपधस्य च इति गुणः ( इत्यादिकार्यम् )। 'तुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते' इति भावः। एवम्—अर्त् अरत् अ—अ अर्त्त अ—आ अर्त्तअ ( अत आदेः—२२४८ )—नुट् अर्त्त अ=आनर्त्त ( 'तस्मान्नुड्—द्विहलः' ) अर्तिष्यते—गुण इट् स्यति। आर्तीत्—( लुङ् ) आट् ऋत् सिच् ईट् त् आ अरत् इ० ईत् ( आडजादीनामित्याट्—'नेटीति' वृद्धिनिषेधाद्गुणेन 'अरत्' इति—इट ईटीति सलोपः। आ अर्तीत् = आर्तीत्। एवम् आर्तिष्टाम्—आर्तिषुः। आर्तीः आर्तिष्टम् आर्तिष्ट। आर्तिषम् आर्तिष्व आर्तिष्म। लृङि—आर्तिष्यत् इत्यादिः।

इत्यविरतविद्याविलसनिष्णातस्य नानाशास्त्रनदीष्णस्य मसूदावस्तव्यस्य कायस्थस्य सुरटहालनाम्नः स्वर्गतस्य श्रीसारदारञ्जनविद्याविनोदस्य सूनुना श्रीकुमुदरञ्जनेन कृतायाः मितभाषिण्याख्यायाः वैयाकरणसिद्धान्तकौमुदीव्याख्यायाः उत्तरार्द्धस्य प्रथमः खण्डः॥

इति तिङन्ते भ्वादिप्रकरणम्।

॥ ओं तत्सत् ॥

